## अन्तर्धौ येनादर्शनमिच्छति। (२८/५९१)

व्यवधानम् अन्तर्धिः। अन्तर्धिनिमित्तं येनादर्शनमात्मन इच्छति तत् कारकमपादानसञ्ज्ञं भवति। उपाध्यायादन्तर्धत्ते। उपाध्यायान्निलीयते। मा [1]मामुपाध्यायो द्राक्षीत् इति निलीयते। अन्तर्धौ इति किम्? चौरान् न दिदृक्षते। इच्छतिग्रहणं किम्? अदर्शनेच्छायां सत्यां [2]सत्यपि दर्शने यथा स्यात्॥

## आख्यातोपयोगे। (२९/५९२)

आख्याता प्रतिपादयिता। उपयोगः नियमपूर्वकं विद्याग्रहणम्। उपयोगे [3]साध्ये य आख्याता तत् कारकमपादानसञ्ज्ञं भवति। उपाध्यायादधीते। उपाध्यायादागमयति। उपयोगे इति किम्? नटस्य [4]शृणोति (म.भा. १.३२९)॥

## जनिकर्तुः प्रकृतिः। (३०/५९३)

जनेः कर्ता [5]जनिकर्ता। जन्यर्थस्य जन्मनः कर्ता [6]जायमानः, तस्य[7] या प्रकृतिः [8]कारणम्, हेतुः, तत् कारकमपादानसञ्ज्ञं भवति। शृङ्गाच्छरो जायते। गोमयाद् वृश्चिको जायते (म.भा. १.३२९)॥

## भुवः प्रभवः। (३१/५९४)

कर्तुः इति वर्तते। भवनं भूः। प्रभवत्यस्मात् इति प्रभवः। [9]भूकर्तुः प्रभवो यः[10], तत् कारकमपादानसञ्ज्ञं भवति। हिमवतो गङ्गा [11]प्रभवति (म.भा. १.३३०)। [12]काश्मीरेभ्यो वितस्ता प्रभवति। प्रथमत उपलभ्यते इत्यर्थः॥

## कर्मणा यमभिप्रैति स सम्प्रदानम्। (३२/५६९)

कर्मणा करणभूतेन कर्ता [13]यमभिप्रैति [14]तत् कारकं सम्प्रदानसञ्ज्ञं भवति। अन्वर्थसञ्ज्ञा[15]विज्ञानाद् ददातिकर्मणा इति विज्ञायते। उपाध्यायाय गां ददाति (म.भा. १.३३०)। [16]माणवकाय भिक्षां ददाति।

[५९] क्रियाग्रहणमपि[17] कर्तव्यम्। (म. भा. १.३३०)

क्रिययाऽपि [18]यमभिप्रैति स [19]सम्प्रदानम्। श्राद्धाय [20]निगर्हते। युद्धाय सन्नह्यते। पत्ये शेते (म. भा. १.३३०)।

सम्प्रदानप्रदेशाः–'चतुर्थी सम्प्रदाने' (२.३.१३/५७०) इत्येवमादयः।

[६०] कर्मणः करणसञ्ज्ञा वक्तव्या सम्प्रदानस्य च कर्मसञ्ज्ञा। (म. भा. १.३३१)

पशुना रुद्रं यजते। पशुं रुद्राय ददाति इत्यर्थः (म. भा. १.३३१)॥

---

1. मामसौ उपाध्यायः अ. 2. सत्यपि दर्शने नास्ति ह. 3. वाच्ये ह. 4. गाथां इत्यधिकम् ह. न्या, ग्रंथिकस्य शृणोति अ. फ. 5. जनिकर्ता नास्ति फ. 6. बः इत्यधिकम् ह. 7. जायमानस्य इत्यधिकम् ड. 8. करणं ब. क, कारकं फ. 9. भुवः कर्तुः क. ह. 10. अर्थः इत्यधिकम् फ. 11. प्रवहति फ. 12. कश्मीरेभ्यो क. 13. यमर्थमभिप्रैति अ. क. ड. फ. ह. ई. 14. स सम्प्रदानसञ्ज्ञो भवति ह. 15. °विधानाद् ड. 16. उदाहरणमिदं नास्ति फ. 17. अपि नास्ति फ. 18. यमर्थम् फ. ड. 19. संप्रदानसंज्ञो भवति अ. फ. ह. 20. निगलभयते ह.